# .. shrIhanUmatstotram 3 ..

# ॥ श्रीहनूमत्स्तोत्रम् ३ ॥

## Document Information

Text title : hanUmatstotram3

File name : hanUmatstotram3.itx

Location : doc_hanumaana

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Processed by Sowmya Ramkumar

Proofread by : PSA Easwaran psaeaswaran at gmail

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Latest update : September 19, 2014

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીહનૂમત્સ્તોત્રમ્ 3 ॥

શૃણુ દેવિ પ્રવક્ષ્યામિ સ્તોત્રં સર્વસુખાવહમ્ ।
સર્વકામપ્રદં નૃણાં હનુમત્સ્તોત્રમુત્તમમ્ ॥ ૧॥

તપ્તહાટકસઙ્કાશં નાનાપુષ્પવિરાજિતમ્ ।
ઉદ્યદ્બાલાર્કવદનં ત્રિનેત્રં કુણ્ડલોજ્જ્વલમ્ ॥ ૨॥

મૌઞ્જીકૌપીનકં હેમમયયજ્ઞોપવીતિનમ્ ।
પિઙ્ગલાક્ષં મહાકાયં ટઙ્કશૈલેન્દ્રધારિણમ્ ॥ ૩॥

મૂર્તિત્રયાત્મકં વીરં મહાશૌર્યં મહાહનુમ્ ।
હનૂમન્તં વાયુસૂનું નમામિ બ્રહ્મચારિણમ્ ॥ ૪॥

ત્રિવર્ણાક્ષરમન્ત્રસ્થં જપાકુસુમસન્નિભમ્ ।
નાનાભૂષણસંયુક્તમાઞ્જનેયં નમામ્યહમ્ ॥ ૫॥

પઞ્ચાક્ષરસ્થિતં દેવં નીલનીરદસન્નિભમ્ ।
પૂજિતં સર્વદેવૈસ્તુ રાક્ષસારિં નમામ્યહમ્ ॥ ૬॥

અચલદ્યુતિસઙ્કાશં સર્વાલઙ્કારભૂષિતમ્ ।
ષડક્ષરયુતં દેવં નમામિ બ્રહ્મચારિણમ્ ॥ ૭॥

સપ્તવર્ણમયં દેવં હરીશં તં સુરાર્ચિતમ્ ।
સુન્દરાસ્યાબ્જસંયુક્તં ત્રિનેત્રં તં નમામ્યહમ્ ॥ ૮॥

અષ્ટાદશાધિપં દેવં હેમવર્ણં મહાતનુમ્ ।
નમામિ જગતાં વન્દ્યં લઙ્કાપ્રાસાદદાહનમ્ ॥ ૯॥

અતસીપુષ્પસઙ્કાશં દશવર્ણાત્મકં વિભુમ્ ।
જટાધરં ચતુર્બાહું નમામિ કપિનાયકમ્ ॥ ૧૦॥

દ્વાદશાક્ષરમન્ત્રસ્ય નાયકં કુન્તધારિણમ્ ।
હેમવર્ણલસત્કાયં ભજે સુગ્રીવમન્ત્રિણમ્ ॥ ૧૧॥

માલામન્ત્રાત્મકં દેવં ત્રિવર્ણં ચ ચતુર્ભુજમ્ ।
પાશાઙ્કુશધરં દેવં કપિવર્યં નમામ્યહમ્ ॥ ૧૨॥

ત્રયોદશાક્ષરહિતં સીતાદુઃખનિવારણમ્ ।
સુરાસુરગણૈઃ સર્વૈઃ સંસ્તુતં પ્રણમામ્યહમ્ ॥ ૧૩॥

હાહાકારમુખાન્તનિત્યદહનજ્વાલાસમૂહોજ્જ્વલં
વિદ્વન્મણ્ડલજાતરોષપરુષં શ્રીરામદાસં વિભુમ્ ।

સચ્ચૂર્ણીકૃતધૂમ્રલોચનમહાહ્યક્ષાદિરક્ષોબલં
તં વન્દે રવિધારણં સુરવરૈર્વન્દ્યં સમીરાત્મજમ્ ॥ ૧૪॥

રઘુપતિપદભક્તં કિઙ્કિણીકોત્તમાઙ્ગં
મુકુલિતકરપદ્મં મોદયાનં તરઙ્ગે ।
પુલકિતવિપુલાઙ્ગં પુણ્યલીલાનુષઙ્ગં
વનચરકુલનાથં વાયુપુત્રં નતોઽસ્મિ ॥ ૧૫॥

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

.. shrIhanUmatstotram 3 ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*